## कवेः टीकारामस्य *शैलं समालिङ्गति मेघमाला* कवितायाः साहित्यिकमनुशीलनम्

महानन्दतिमिल्सिना, विद्यावारिधि[1]


**सारः**

नैपालकसंस्कृतकाव्यपरम्परायां कवेः टीकारामस्य विशिष्टमवदानं वर्तते । नेपालीभाषायां संस्कृतभाषायाञ्चास्य नैकानि काव्यानि प्रकाशितानि सन्ति । परिष्कृतां प्राञ्जलां च भाषाशैलीमवलम्ब्य संरचितानि विविधेषु विषयेषु विधासु च निर्मितानि कवेः काव्यानि मानवजीवनस्य कृते प्रेरणास्रोतांसि विद्यन्ते । प्रकृतिजगतो वैविध्यं प्रस्तूय तद्वर्णनमाध्यमेन कविना नेपालीसमाजस्य संस्कृतेश्च चित्रणमपि कृतं विलोक्यते ।

प्रस्तुते समीक्षणलेखे कवेः टीकारामस्य 'शैलं समालिङ्गति मेघमाला' इति कवितायाः काव्यतत्त्वदृष्ट्या विश्लेषणं कृतमस्ति । कवेः टीकारामस्य २०६४ तमे वैक्रमाब्दे प्रकाशितस्य 'पद्यपुष्पाञ्जलिः' इति कवितासङ्ग्रहे विद्यमानासु कवितासु मध्येऽस्मिन् समीक्षणे विवेचनीया कविता सैव वर्तते । अस्यां कवितायां कीदृशा अलङ्काराः प्रयुक्ताः सन्ति, अत्र रसध्वन्यादीनामवस्था कीदृशी, कवितायां गुण-रीति-भाषाशैली-उद्देश्यादितत्त्वानामवस्था कीदृशीत्यादिषु विषयेष्वस्मिन् आलेखे विवेचनं कृतमस्ति । अस्य लेखस्य सामग्रीविश्लेषणक्रमे प्राथमिक्याः सामग्र्या रूपेण कवेः टीकारामस्य कवितासङ्ग्रहस्य विश्लेषणीया कविता सङ्गृहीता तथैव द्वितीयसामग्रीरूपेण विविधैः पौरस्त्यैराचार्यैः प्रतिपादिताः काव्यसिद्धान्ताः प्रयुक्ताः सन्ति । अत्र सामग्रीविवेचने वर्णनात्मकः, विश्लेषणात्मकः, व्याख्यात्मकश्च विधिः प्रयुक्तो विद्यते । विवेचनीयायां कवितायां विविधैः शब्दार्थालङ्कारैः प्रकृतेः सुन्दरं चित्रणं कृतमस्ति । शृङ्गाररसस्य प्रयोगेण कविता सहृदयानां कृते हृदयाह्लादिका वर्तते । मेघमालायाः व्यवहारे मानवव्यवहारस्य समारोपात् मानवीकरणाद्वा कवितेयं प्रभावकारिणी, भावगभीरा च संलक्ष्यते ।


*शब्दकुञ्जिका* : अलङ्कारः, रसः, गुणः, प्रकृतिः, मानवीकरणम् ।

### १. परिचयः

संस्कृतवाङ्मये पुराणेतिहास-धर्म-दर्शन-समाज-राजनीति-साहित्यसदृशेषु विषयेषु संरचितानि नैकानि ग्रन्थरत्नानि प्राप्यन्ते । विश्वस्य प्राचीनतमायामस्यां भाषायां कालिदास-भारवि-माघादिभिः कविभिर्गुणभावभरितानि सुललितानि काव्यानि लिखितानि । संस्कृतकाव्यगौरवेणैव ते कवयो विश्ववन्द्याः, विश्वविख्याताश्च विद्यन्ते । नेपालदेशेऽपि कुलचन्द्रगौतमः, सोमनाथसिग्देलः, दधिराममरासिनी, पूर्णप्रसादब्राह्मणः, माधवप्रसाददेवकोटा, उमानाथपन्थी, हरिप्रसादाचार्यः, भीमकान्तपन्थी, भरतराजमन्थलीयः, टीकारामपन्थी, वेणीमाधवढकालसदृशानां विदुषां संस्कृतभाषासाहित्यस्य सम्बर्द्धने महद्योगदानमवलोक्यते । विश्वसंस्कृतसाहित्यपरम्परायां कवेः टीकारामस्यापि समुल्लेख्यमवदानं प्रतिभाति ।

कविः टीकारामोऽधिकारी नेपालदेशस्य कास्कीमण्डलस्य मिजुरडाँडाग्रामे २००७ तमे वैक्रमाब्दे सञ्जातः । संस्कृतसाहित्ये नेपालीसाहित्ये च स्नातकोत्तरकक्षासमुत्तीर्णेनानेन संस्कृतसाहित्ये विद्यावारिध्युपाधिरप्यधिगता । नेपालसंस्कृतविश्वविद्यालयान्तर्गतस्य वाल्मीकिविद्यापीठस्य प्राध्यापकोऽसौ २०७६ तमवैक्रमाब्दस्य ज्येष्ठमासस्य पञ्चदशे दिनाङ्के देवलोकं गतः । अनेन कविना संस्कृतभाषायां नेपालीभाषायां च नैकानि काव्यरत्नानि निर्मितानि सन्ति ।

[1] उपप्राध्यापकः नेपाल संस्कृत विश्वविद्यालय, पिण्डेश्वरविद्यापीठम्, धरान ।
Email: timsinamahananda@gmail.com

नेपालीभाषायां 'दुःखको आवाज' (गीतसङ्ग्रहः), 'पहाडी गुनासो' (गीतसङ्ग्रहः), 'महाकवि कालिदास' (समालोचनात्मको ग्रन्थः), 'कवितासङ्गम' (कवितासङ्ग्रहः), 'पण्डित कुलचन्द्र गौतम र उनको साहित्यसाधना' (समालोचनात्मको ग्रन्थः), 'उज्जयिनीको राजघराना' (श्लोकानुवादः), 'प्रणयमेधा' (श्लोकानुवादः), 'यक्षसुन्दरी' (श्लोकानुवादः), 'प्रणयसुधा' (खण्डकाव्यम्), 'प्रेयसीका परेली' (कवितासङ्ग्रहः), 'पञ्चगङ्गा' (काव्यसङ्ग्रहः), 'कल्पनाका छाल' (कवितासङ्ग्रहः), 'हेमालाई पत्र' (पत्रसाहित्यम्), 'विश्वम्भरा' (महाकाव्यम्), 'बालिकावधू' (संस्मरणम्) च प्रकाशिता ग्रन्थाः सन्ति । विविधासु पत्रपत्रिकास्वस्य शतत्रयाधिका स्फुटकविता निबन्धाश्च प्रकाशिताः प्राप्यन्ते (पाण्डेयः, २०७६ : संस्कृतपृष्ठम्) ।

एवमेवास्य कवेः चन्द्रप्रभा (खण्डकाव्यम्), गोविन्दचरितामृतम् (खण्डकाव्यम्), पद्यपुष्पाञ्जलिः (कवितासङ्ग्रहः) चेत्यादीनि संस्कृतभाषायां लिखितानि काव्यरत्नानि प्राप्यन्ते । कविनानेन संस्कृतभाषाया नेपालीभाषायाश्च क्षेत्रे साहित्यस्य प्रवर्द्धने च महती भूमिका प्रदर्शिता । विवेचनीया 'शैलं समालिङ्गति मेघमाला' इत्यष्टादशश्लोकात्मिकी कविता 'पद्यपुष्पाञ्जलिः' इति कवितासङ्ग्रहे प्राप्यते ।

अस्मिन् कवितासङ्ग्रहे भक्तिपराः, शृङ्गारपराः, करुणपराश्च कविताः सङ्कलिता विद्यन्ते । तत्र भक्तिपरासु कवितासु सुरभारती वन्दना, जय जगदम्बे !, भगवन् ! भुवि शान्तिरस्तु सा, कृष्णास्तवनम्, हर ! विहर, मम खलु देशः, भजत संस्कृतम्, श्रीकालिदासो जगतान्महाकविः, जयतु संस्कृतम्, विदुषां लक्षणमेतदीरितम्, विद्वच्छिरोमणि-कुलचन्द्रवन्दना, योगिनरहरिनाथ-श्रद्धाञ्जलिः, स्वामिरामदेव-समर्चा, विद्वत्पञ्चानननमनम्, श्रीमद्गणपतिसच्चिदानन्दस्वामिवर्यप्रस्तुतः सादरपद्यप्रसूनाञ्जलिः, शान्तिप्रदो भवतु नूतनवत्सरोऽयम्, विश्वविद्यालय-शुभकामना, शम्भो ! त्वमाविर्भव चेति विद्यन्ते । एवञ्चास्मिन् कवितासङ्ग्रहे शृङ्गारपरासु कवितासु विभाति नेपालधरा विशाला, शैलश्रिया कान्तिपुरी विभाति, शैलं समालिङ्गति मेघमाला, वनश्रिया क्रीडति किं वसन्तः ?, कान्तेव खेदशमनी मम लेखनीयम्, हसतीव शरद् विमलाऽम्बुधरा, कथन्नाऽऽगता हे प्रिये ! वन्यभोगे ? चेति सङ्कलिताः सन्ति । तथैव करुणपरासु कवितासु भूविचलनम्, मातृभूशोकदुर्दिनम्, मातृमलिनतावितर्कः, शोकसरित्, ऋषीश्वरलामिछानेसमर्चा चेति विद्यन्ते (अधिकारी, २०६४ : ङ-च) ।

## २. पूर्वकार्यसमीक्षणम्

कवेः टीकारामस्य विषये कैश्चिदनुसन्धातृभिः सामान्यतः किमप्यनुसंहितं किमप्यधीतञ्च दृश्यते । तद्रचितकाव्यानां स्फुटकवितानां च विषयेऽद्य यावद् विस्तृतमनुसन्धानं न जातम् । लेखरचना-टिप्पणीभूमिकालेखनादिमाध्यमेन अनुसन्धातृभिरध्येतृभिर्वा टीकारामस्य तदीयरचनायाश्च विषये यत्किमपि प्रस्तुतं तद्विवरणं क्रमेणाधः प्रस्तूयते -

१. २०६९ तमे वैक्रमाब्दे प्रकाशितायाः टीकारामविरचितायाः पञ्चगङ्गा इति काव्यसन्दोहिकायाः भूमिकाखण्डे (पृ. १०) राष्ट्रकविर्माधवप्रसादघिमिरे 'पञ्चकाव्यको पञ्चामृत चाख्दा' इति समीक्षामाध्यमेन कवेः टीकारामस्य काव्यवैशिष्ट्यं प्रकाशयति । असौ कविः धार्मिक-सांस्कृतिक-नैतिक-सामाजिक-राजनीतिकविषयान् कवितायां परिणतवान् इति प्रतिपादयति । टीकारामस्य कवितायां संस्कृतस्य, समाजस्य राष्ट्रभक्तेर्भावना प्रकटिता वर्तते । तथैवास्य कवितासु मानवजीवने संलक्षितस्य प्रेम्णः, वियोगस्य भावनापि दृश्यते । असौ परिष्कारवादी स्वच्छन्दतावादी च कविर्वर्तते इत्यादिना राष्ट्रकविर्घिमिरे विश्लेषणं विदधाति ।

२. पञ्चगङ्गा इति काव्यसन्दोहिकायाः भूमिकाखण्ड एव विद्यावारिध्युपाधियुतः प्राध्यापक वासुदेवः त्रिपाठी टीकारामस्य कवितासन्दर्भे विवेचयति । टीकारामस्य कवितायां तीव्रकर्तव्यबोधः, राष्ट्रबोधः, अध्यात्मचेतः,

मानवीया भावना च प्रमुखरूपेण सन्निविष्टा दृश्यन्ते इति प्रकाशयति । तथैवास्य कवितायाः पद्ये पद्ये सुकुमारत्वं प्रतीयते, निश्चयेनासौ सुकविर्वर्तत इति समीक्षको वासुदेवो विश्लेषयति ।

३. पञ्चगङ्गा इति काव्यसन्दोहिकायाः भूमिकाखण्डे (पृ.११-१२) विद्यावारिध्युपाधियुतः प्राध्यापको वेणीमाधवढकाल 'सारस्वतगङ्गाका रूपमा पञ्चगङ्गा' इति शीर्षकमाध्यमेन टीकारामस्य काव्यगौरवं विवेचयति । कविः टीकारामोऽधिकारी प्रकृतिसौन्दर्यस्य गायकः, परम्परागतायाः संस्कृतेः समुन्नायको ललितकविर्वर्तते । असौ नेपालीसाहित्यस्य संस्कृतसाहित्यस्य च महान् साधकोऽस्ति । कविरसौ शान्ति-प्रीति-प्रशस्ति-दीप्तिशब्दानां पर्यायत्वेन परिचितो वर्तते । अस्मिन् कवौ कल्पनाविच्छित्तिः, धार्मिकी प्रवृत्तिः, आध्यात्मिकी भावना च दरीदृश्यते । असौ सहजया प्रतिभया सम्पन्न कविर्वर्तत इति समीक्षको वेणीमाधवो विवेचयति ।

४. २०७० तमे वैक्रमाब्दे जयतु संस्कृतम् नामिकया संस्थया प्रकाशिते संस्कृतकवितासङ्ग्रहः(द्वितीयपुष्पम्) कवितासङ्ग्रहस्य विश्लेषणक्रमे समीक्षको नवराज कट्टेलः कवेः टीकारामस्य कवितायां प्रकृतिजगतो मनोरमं चित्रणं प्राप्यत इति समीक्षते (पृ. २१०) ।

५. २०७२ तमे वैक्रमाब्दे प्रकाशितस्य टीकारामविरचितस्य 'कल्पनाका छाल' इति नेपालीभाषायां विरचितस्य कवितासङ्ग्रहस्य भूमिकाखण्डे प्राध्यापको ठाकुरपराजुली कवेः टीकारामस्य वैशिष्ट्यं प्रतिपादयति । विद्यावारिध्युपाधियुतो टीकारामोऽधिकारी संस्कृतसाहित्यस्य विद्वान् वर्णमात्रिकाया नेपालीकविताया साधकोऽस्तीति कथयति । आजीवनं संस्कृतसाहित्यप्राध्यापनात् साहित्यस्य सूक्ष्मभावानुसन्धानेऽसौ प्रयत्नशीलो दृश्यते इत्युक्तवान् । संस्कृतभाषायामस्य प्रौढी रचना, भावगाम्भीर्यञ्च वर्तते, अस्य कवेः 'कल्पनाका छाल' इति कवितासङ्ग्रहश्चित्रविचित्रैः पुष्पैः युता वाटिकातुल्योऽस्तीति विश्लेषयति ।

६. २०७२ तमे वैक्रमाब्दे प्रकाशितस्य टीकारामविरचितस्य 'कल्पनाका छाल' इति नेपालीभाषायां विरचितस्य कवितासङ्ग्रहस्य भूमिकाखण्ड एवापरः समीक्षकः प्राध्यापको मुकुन्दशरणोपाध्यायः 'हार्दिक शुभाशंसा' इति शीर्षके टीकारामस्य कवित्वं प्रकाशयति । टीकारामोऽधिकारी नेपालीकविताया आकाशे समुदितः प्रकाशमानश्च तारकोऽस्तीति कथयति । अस्य कविताः पठनीयाः सन्ति, अनुवादसाहित्येऽप्यसौ लब्धप्रतिष्ठो वर्तते । अनुसन्धानक्षेत्रेऽप्यसौ कुशलः संलक्ष्यते । संस्कृतसाहित्यस्य नेपालीसाहित्यस्य च विकासे कविरसौ समर्पितो वर्तते । संस्कृतपद्यानां समच्छन्दसि छायानुवादेऽप्यस्योत्कृष्टता दरीदृश्यत इति समीक्षको मुकुन्दशरणः टीकारामं परिचाययति ।

७. २०७२ तमे वैक्रमाब्दे प्रकाशितस्य महाकाव्यकारस्य टीकारामस्य विश्वम्भरा इति नेपालीभाषायां विरचितस्य महाकाव्यस्य भूमिकायां (पृ.क-ङ) विद्यावारिध्युपाधियुतः प्राध्यापको माधवभट्टराई 'विश्वम्भराको सन्देश र शैली' शीर्षकेऽस्य महाकाव्यस्य सापेक्षतायां कवेः टीकारामस्य वैशिष्ट्यं प्रकाशयति । टीकारामः संस्कृतसाहित्यस्य नेपालीसाहित्यस्य च सिद्धहस्तः कविः । अस्य काव्येषु उपमोत्प्रेक्षाप्रभृतीनामलङ्काराणां सान्दर्भिकः प्रयोगो दृश्यते । राष्ट्रियता देशभक्तिश्चास्य काव्यगतं वैशिष्ट्यमस्ति । अस्य ऋतम्भरामहाकाव्ये पौरस्त्यपाश्चात्यलक्षणानि पूर्णरूपेण सङ्घटन्ते । सामयिकं विषयमवलम्ब्य रचितमिदं महाकाव्यं देशे शान्तिं समुन्नतिं च कामयत इत्युक्त्वा कवेः टीकारामस्य काव्यप्रवृत्तिं विवेचयति ।

८. २०७२ तमे वैक्रमाब्दे प्रकाशितस्य कवेः टीकारामस्य 'हेमालाई पत्र' इति नेपालीभाषायां विरचितस्य पत्रसाहित्यस्य भूमिकायां विद्यावारिध्युपाधिप्राप्तः प्राध्यापक अयनबहादुरश्रेष्ठः 'मन्तव्य' शीर्षके कवेः टीकारामस्य काव्यवैशिष्ट्यं प्रकाशयति । अस्मिन् काव्ये नायिकया हेमया पतिं प्रति प्रेषितैः पत्रैर्ज्ञायते यत् हेमा वैदिकधर्मावलम्बी हिन्दुनारी वर्तते । सा पतिसेवायां तल्लीना सुखदस्य दाम्पत्यजीवनस्य कृते समर्पिता विदुषी

विद्यते । पतिवियोगेऽस्या मनस्थितिरुद्विग्ना दृश्यते । पाश्चात्यसंस्कृतिमवलम्बनोत्सुकानां दम्पतीनां कृते पौरस्त्यसंस्कृतिमेवावलम्बितुमेषा लघुकृतिः प्रेरणादायी वर्तत इति समीक्षक अयनबहादुरमहाभागो विश्लेषणं विदधाति ।

९. २०७५ तमे वैक्रमाब्दे नेपालसंस्कृतविश्वविद्यालयस्य प्राध्यापकसङ्घेन प्रकाशिते शोधनामिकायामनुसन्धानात्मिकायां पत्रिकायां विद्यावारिध्युपाधिप्राप्तोपप्राध्यापको महानन्दतिमिल्सिना 'कवेः टीकारामस्य मातृभूशोकदुर्दिनं कवितायाः विश्लेषणम्' इति शीर्षके (पृ.८१) कवेः टीकारामस्य काव्यप्रवृत्तिं परिचाययति । नैपालकस्य सुरम्यायाः प्रकृतेश्चित्रणे कविरसौ कुशलोऽस्ति । नेपालदेशे विद्यमानानां सौन्दर्यसूचकानां हिमालय-नदी-वन-पर्वत-निर्झरप्रभृतीनां तत्त्वानां सूक्ष्मरूपेण वर्णनेऽसौ ख्यातो दृश्यते । समाज-धर्म-संस्कृति-राजनीति-नीत्युपदेशप्रतिपादनेऽप्यस्य कविताः प्रसिद्धाः सन्तीत्युक्त्वा समीक्षको महानन्दः समीक्षते ।

१०. २०७६ तमवैक्रमाब्दस्य आषाढप्रथमदिवसे प्रकाशिते गोरखापत्रदैनिकनामिकायां पत्रिकायां समीक्षको हरिपाण्डेयः'पथिकः' 'निरातङ्कं जीवमानष्टीकारामोऽधिकारी' इति शीर्षके संस्कृतकाव्यजगति लब्धप्रतिष्ठस्य विदुषः टीकारामस्य निधनात् व्याकुलीभूयास्य कवेर्योगदानं स्मरति, विवेचयति च । कविताकामिनीवल्लभः टीकारामो वपुषा सुन्दरः, वेषेण सभ्यः, वचसा मृदु, चेतसा स्निग्धः, प्रकृत्या सौम्यः, प्रतिभया स्फीतः, व्युत्पत्त्या सुदृढः, यशसा समुन्नतश्चासीत् । नह्ययं कदापि वैदुष्यस्य, पदस्य, कुलस्य, सम्पदश्चाभिमानं प्रकटयति स्म । सरलहृदयोऽयं वयसा विद्यया च कनीयांसोऽपि जनान् परमसुहृदिव व्यवहरति स्म, हार्दान् भावांश्च प्रकटयति स्म । अस्य वचसि कठोरता न केनापि श्रुताऽनुभूता वा । स्वभावेनान्तर्मुखोऽयं वैमत्यं रोषं दैन्यञ्च अन्तर्मनस्येव विलीय सस्मितेन मुखमण्डलेन स्निग्धेन च वचसा प्रसन्नहृदय इव विभाव्यते स्म । परिस्थित्यनुरूपान् संस्कृतश्लोकानुद्धृत्य निकटस्थितान् रसेनाप्लावयितुं कुशलोऽयं विषण्णानपि प्रसन्नान् सम्पादयति स्म । वार्तालापावसरेऽपि संस्कृतकाव्यान्तर्गतानि रसमयानि पद्यानि सुमधुरस्वरेण सगद्गदं प्रस्तौति स्म ।

दिवानिशं संस्कृतकाव्यानुशीलननिरतष्टीकाराम आशुकविर्ललितकविश्चासीत् । अयं पर्यन्तजीवनेऽपि कविगोष्ठीषु मधुरस्वरेण कवितावाचने समुत्सुको भवति स्म । अस्य स्वरमाधुर्येण कविताया भावगाम्भीर्येण च सहृदयाः गद्गदहृदयमेनं प्रशंसन्ति स्म । अस्य काव्यकृतिषु कलासौन्दर्यस्य भावगाम्भीर्यस्य च सामञ्जस्यं दृश्यते । कविताप्रणयने दाम्पत्यप्रेम, प्रकृतिप्रेम, राष्ट्रियता, ग्रामीणजीवनानुरक्तिः, सामयिकी विसङ्गतिश्चास्य रुचिक्षेत्राणि दृश्यन्ते । कोमलपदरचना, वार्णिकच्छन्दसां प्रयोगः, छन्दोवैविध्यम्, संस्कृतकाव्यपरम्परानुसारिणी अलङ्करणपद्धतिः, रसमयता चेत्याद्या विशेषता एतत्प्रणीतासु कवितासु समुपलभ्यन्ते । रसात्मककविताप्रणयने कुशलस्यास्य शृङ्गारमयी प्रवृत्तिः स्फुटकवितासु प्रबन्धकाव्येषु च परिपुष्टा समास्वाद्यते । अस्य शृङ्गारप्रेम समकालिककविसमाजेऽपि प्रसिद्धोऽस्ति ।

प्रा. डा. टीकाराम-अधिकारिमहाभागेन वाल्मीकि-विद्यापीठे २०३० तमवैक्रमाब्दतः २०७० तमवैक्रमाब्दपर्यन्तं चत्वारिंशत् वर्षाणि यावत् प्राध्यापनं कृतम् । अनेन तदवसरे विद्यापीठे साहित्यविभागस्य अध्यक्षपदम्, नेपाल-संस्कृत-विश्वविद्यालये विषय-समिति-सदस्यपदम्, विश्वविद्यालयान्तर्गतेऽनुसन्धानकेन्द्रे अनुसन्धान-परिषत्सदस्यपदञ्चालङ्कृत्य कार्यं सम्पादितम् । राष्ट्रियासु अन्ताराष्ट्रियासु च गोष्ठीषु कार्यपत्र-प्रस्तुतिः, गोष्ठीनामध्यक्षता चानेन विहिता । क्वचित् प्रमुखातिथ्यम्, क्वचित् विशिष्टातिथ्यम्, क्वचित् प्रतियोगितादौ मूल्याङ्कनञ्च विहितम् । एतेन संस्कृत-प्राज्ञिक-जगति अस्य सुदृढा समुपस्थितिः सुमहदवदानञ्च दृश्यत इति समीक्षको हरिपाण्डेयः समीक्षते ।

कवेः टीकारामस्य जीवनवृत्तकविताकाव्यानां च विषयेऽत्र प्रस्तुताभिः पूर्वकार्यसमीक्षाभिर्ज्ञायते यत् अस्य कतिपयेषु कृतिषु कतिपयैः समीक्षकैः सङ्क्षिप्तरूपेण समीक्षा विहिता । तैः कस्यामपि कवितायां केन्द्रीभूय

विश्लेषणं नैव कृतम् । नैपालकस्य संस्कृतसाधकस्य टीकारामस्य भावगाम्भीर्यानां रसमयानां कवितानां सूक्ष्मरूपेण विश्लेषणं विधातुं आवश्यकं परिलक्ष्यात्र 'शैलं समालिङ्गति मेघमाला' इति कवितायाः साहित्यिकमुशीलनं विधीयते ।

## ३. समस्याकथनम्

नैपालकस्य संस्कृतकाव्यपरम्परायां कवेः टीकारामस्य महद्योगदानं वर्तते । स्फुटकवितामाध्यमेन खण्डकाव्यमाध्यमेन चानेन संस्कृतकाव्यजगत् प्रकाममुपकृतम् । अस्य संस्कृतकविताकाव्यादिविषये विस्तृतरूपेणाध्ययनं विश्लेषणं च नैव जातमस्ति । पद्यपुष्पाञ्जलिकवितासङ्ग्रहे तदन्तर्गतायाः 'शैलं समालिङ्गति मेघमाला' इति कविताया विषये चाध्ययनं नैव कृतमस्ति । अस्यां कवितायां कीदृशानि काव्यतत्त्वानि समाविष्टानि सन्ति, कवितायां प्रकृतेः समाजस्य च कीदृशं चित्रणमस्ति इत्यादयो विषया अस्मिन् लेखे मूलसमस्यारूपेण समाविष्टाः सन्ति । एताः समस्याः बिन्दुरूपेणाऽधो प्रदर्श्यन्ते -

क. 'शैलं समालिङ्गति मेघमाला' कवितायामलङ्कारछन्दःरसादीनां काव्यतत्त्वानां कीदृशः प्रयोगः ?

ख. 'शैलं समालिङ्गति मेघमाला' कवितालेखनस्योद्देश्यं किम्, भाषाशैली च कीदृशी ?

## ४. उद्देश्यम्

समस्यायां समागतानां प्रश्नानां समाधानस्यान्वेषणमेवास्याध्ययनस्योद्देश्यमस्ति । प्रस्तुतस्याध्ययनस्योद्देश्यानि बिन्दुरूपेणाधो निर्देशितानि सन्ति -

क. 'शैलं समालिङ्गति मेघमाला' कवितायामलङ्कारछन्दःरसादीनां काव्यतत्त्वानां समीक्षणम् ।

ख.'शैलं समालिङ्गति मेघमाला' इति कवितालेखनस्योद्देश्यप्रकाशनम्, भाषाशैलीविवेचनञ्च ।

## ५. सीमाङ्कनम्

अस्मिन् लेखे कवेः टीकारामस्य 'शैलं समालिङ्गति मेघमाला' इति कवितायाः साहित्यिकं समीक्षणं प्रस्तुतमस्ति । अलङ्कारप्राधान्येनात्र विवेचनं विहितं वर्तते । कवितायां संलक्षितानां रसध्वनिगुणरीत्यादीनां काव्यतत्त्वानां प्रकृतिसमाजदर्शनादीनां सन्दर्भाणां च सङ्क्षेपेण विश्लेषणं कृतमस्ति । कवितायां समागतानां सकलानां पक्षाणां विस्तरेण विवेचनमत्र नास्ति । एतदेवास्य लेखस्य सीमाङ्कनम् ।

## ६. अध्ययनविधिः

अस्मिन् अध्ययने पुस्तकालयीयानां सामग्रीणामुपयोगो विहितोऽस्ति । अत्र द्वितीयके स्रोतसि विद्यमानानां सामग्रीणां प्रयोगोऽस्ति । कवितायाः विवेचनक्रमेऽत्र संस्कृतकाव्यशास्त्रिणां लाक्षणिकानां ग्रन्थानामुपयोगः कृतः । विविधैः काव्यशास्त्रिभिः प्रतिपादितानामलङ्काररसध्वनिगुणरीत्यादिविषयाणामध्ययनेनात्र विवेचनं कृतं वर्तते ।

## ७. 'शैलं समालिङ्गति मेघमाला' कविताया विश्लेषणम्

कवेः टीकारामस्य 'शैलं समालिङ्गति मेघमाला' इति कविता २०६४ तमे प्रकाशिते पद्यपुष्पाञ्जलिकवितासङ्ग्रहे सङ्कलितमस्ति । लेखकेनैव काष्ठमण्डपतः प्रकाशितेऽस्मिन् पुस्तके त्रिंशत्सङ्ख्यकाः कविता वर्तन्ते । तत्राष्टादशसङ्ख्यका भक्तिस्तवनपरकाः, सप्तसङ्ख्यकाः शृङ्गारस्तवनपरकाः, पञ्चसङ्ख्यकाः करुणास्तवनपरकाः कविता विद्यन्ते । अत्र कविना सरस्वती-दुर्गा-भगवन्-कृष्णा-शिवप्रभृतीनां देवदेवीनां स्तुतिर्विहिता, तथैव कालिदास-कुलचन्द्र-रामदेव-योगिनरहरिनाथ-पञ्चानन-विदुषां च प्रशंसनं विहितम्, एवमेवानेन देशस्य संस्कृतस्य विश्वविद्यालयस्य नूतनवत्सरस्य विषयेऽपि कविताः लिखिताः । कविना नेपालधरा-

कान्तिपुरी-मेघमाला-वसन्त-लेखनी-शरद्-प्रियाविषयिणी शृङ्गारपरकाः कवितापि संरचिता, तथैव भूविचलन-शोकसरित्प्रभृतीनां कारुणिकानां कवितानां रचनयाऽनेन विविधक्षेत्रगतं स्वकीयं विपुलं ज्ञानं गभीरं भावं च प्रकाशितम् । अस्मिन्नेव सङ्ग्रहे विद्यमानस्य 'शैलं समालिङ्गति मेघमाला' इति कविताया पौरस्त्यकाव्यतत्त्वानामाधारेणात्र समीक्षणं विधीयते ।

### ७.१ अलङ्कारप्रयोगः

अलं क्रियते अनेनेत्यलङ्कार इति करणप्रधानव्युत्पत्त्याऽलङ्कारशब्दः शरीरसुषमावर्द्धकानां हारादीनामिव काव्यशोभासम्पादकानामनुप्रासोपमालङ्काराणां वाचकः । अलङ्कृतिरलङ्करणं वाऽलङ्कारः इति भावप्रधानोऽलङ्कारशब्दः सर्वेषां साहित्यसौन्दर्याधायकतत्त्वानां वाचकः । वामनपूर्ववर्तिनो भामहोद्भटादयो गुणालङ्कारयोरभेदमङ्गीकुर्वन्ति, परं वामनः 'काव्यशोभायाः कर्तारो धर्मा गुणास्तदतिशयहेतवस्त्वलङ्काराः' ( वामन, ई. २०१० : १-२) इति स्वसिद्धान्तं प्रकटयति । ध्वन्यालोककार आनन्दवर्धनः काव्यस्य प्रधानभूते रसे तदङ्गभूतयोः शब्दार्थयोरङ्गरूपेणाऽऽश्रिता अलङ्काराः कटकादिवद् भवन्तीति प्रतिपादयति । यथा -

तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः ।

अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत् ॥ (आनन्दवर्धनः, २०११ : ३४१ )

मम्मटप्रतिपादितस्यालङ्कारस्य लक्षणानुसारेणाङ्गिनं रसमनुप्रासोपमादयोऽलङ्काराः शब्दार्थमाध्यमेनोपकुर्वन्ति, परं सर्वदैव न  कदाचिदेव । उक्तञ्चानेन -

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।

हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥ (मम्मटः, ई. १९९४ : ३८५) ।

मूलतोऽलङ्कारा द्विविधा- शब्दालङ्काराः, अर्थालङ्काराश्च । 'शैलं समालिङ्गति मेघमाला' इति कवितायां द्विविधयोरलङ्कारयोः प्रयोगो विद्यते । अस्यां कवितायां संलक्षितानामलङ्काराणां विवेचनमधः प्रस्तूयते ।

### ७.१.१ अनुप्रासः

स्वरवैसादृश्येऽपि व्यञ्जनवर्णानां साम्येऽनुप्रासः । अस्यापि द्वौ भेदौ दृश्येते । अनेकस्य व्यञ्जनस्य सकृत् सादृश्यं छेकानुप्रासः तथैवैकस्यानेकस्य वा व्यञ्जनस्य द्विर्बहुकृत्वो वा सादृश्यं वृत्त्यनुप्रासः

वर्णसाम्यमनुप्रासः छेकवृत्तिगतो द्विधा ।

सोऽनेकस्य सकृत्पूर्वः एकस्याप्यसकृत्परः ॥ (मम्मटः, ई. १९९४ : ७९)

'शैलं समालिङ्गति मेघमाला' कवितायामनुप्रासालङ्कारस्य बाहुल्येन प्रयोगो दृश्यते ।

अत्र श्लोके श्लोकेऽनुप्रासालङ्कारो विलसति । अनुप्राससंयोजने कविरसौ सिद्धहस्तः प्रतीयते । यथा-

सम्पूर्णगर्भेव नदद्बलाका श्यामा क्वचिद् व्यक्तसुधांशु-हासा ।

वामेव विद्युन्नयनैः कराला शैलं समालिङ्गति मेघमाला ॥ (अधिकारी, २०६४ : ६१)

अत्र सकारवकारादिवर्णानामसकृदावृत्त्या वृत्त्यनुप्रासः ।

यथा वा -

साऽङ्गा निरङ्गाऽपि मृदङ्गताला शैलं समालिङ्गति मेघमाला ॥ (श्लो.१२ )

अत्र ङ-गवर्णयोरनेकवारसाम्यप्रदर्शनाद् वृत्त्यनुप्रासालङ्कारः ।

कवितायां अन्येषु श्लोकेष्वपि जालै-प्रबालैः, ताभि-लताभिः, जाली-शाली, भामिनीव-मानिनीवसदृशेषु पदान्तप्रयुक्तेषु शब्देषु नैकवारमावृत्तिर्दृश्यते । श्लोकस्य स्थाने स्थाने आवृत्तिदर्शनादत्रानुप्रासालङ्कारस्य समीचीनः प्रयोगः प्रतिभाति ।

### ७.१.२ उपमा

भिन्नयोरपि उपमानोपमेययोः साधर्म्ये उपमालङ्कारो भवति । एषोपमा पूर्णालुप्ताभेदेन द्विविधा ।

साधर्म्यमुपमा भेदे पूर्णा लुप्ता च, साऽग्रिमा (मम्मटः, ई. १९९४ : ४३८ ) ।

'शैलं समालिङ्गति मेघमाला' कवितायामुपमालङ्कारस्य बहुत्र प्रयोगोऽवलोक्यते । यथा -

सम्पूर्णगर्भेव नदद्बलाका श्यामा क्वचिद् व्यक्तसुधांशु-हासा ।

वामेव विद्युन्नयनैः कराला शैलं समालिङ्गति मेघमाला ॥ (श्लोकः १)

अत्र मेघमाला उपमेयः, वामा उपमानम्, करालत्वं साधारणधर्मः, इववाचकपदम्, अतोऽत्र पूर्णोपमालङ्कारः । यथा वा -

रुचा सुकेशीव तु मञ्जुघोषा हाहेति भीतैः शिशुभिश्च दृष्टा । (श्लोकः १३)

अस्मिन् श्लोके मेघमाला उपमेयः, सुकेशी उपमानम्, रुचा साधारणधर्मः, इव वाचकपदम् ।

एवमेव 'स्निग्धाऽलकालीव रतिप्रदा सा' इत्यत्राप्युपमालङ्कारः, अत्र सा (मेघमाला) उपमेयः, अलकाली उपमानम्, स्निग्धा रतिप्रदा च साधारणधर्मः, इववाचकपदम् ।

### ७.१.३. मालोपमा

यत्र एकस्योपमेयस्य बहूनि उपमानानि वर्णितानि भवन्ति तत्र मालोपमा । उक्तञ्च -

मालोपमा यदेकस्योपमानं बहु दृश्यते (विश्वनाथः, ई. १९९५ : ८३३) । यथा -

गुहासु लीना शिखरेषु सुप्ता पादप्रपन्नेव च भक्तियुक्ता ।

योषेव काचिन्मदनातुरा वा शैलं समालिङ्गति मेघमाला ॥ (श्लोकः ४)

अत्र एकस्योपमेयरूपाया मेघमालायाः भक्त्या पादप्रपन्ना इव, मदनातुरा योषा इव इत्यादीनां बहूनामुपमानानां प्रयोगादत्र मालोपमालङ्कारः । यथा वा -

विमानलेखेव महाटवीव वितानलीना पिकमण्डलीव ।

दरीव काकाकुलसान्धकारा शैलं समालिङ्गति मेघमाला ॥ (श्लो.१४)

अत्रैकस्या एवोपमेयभूताया मेघमालायाः विमानलेखेव, महाटवीव, पिकमण्डलीव, दरीव इत्यादीनि बहूनि उपमानानि प्रयुक्तानि सन्ति, अतो मालोपमालङ्कारः ।

**७.१.४.रूपकम्**

उपमानोपमेययोरभेदारोपे रूपकालङ्कारः । मम्मटेनोक्तं यत् -

तद्रूपकमभेदो य उपमानोपमेययोः (मम्मटः, ई.१९९४ : ४६४) ।

रूपकालङ्कारे उपमानोपमेययोरतिसाम्याद् भेदप्रतीतिरपह्नुता भवति । यथा -

जलाऽऽलवाला तुहिनांशुभाला तारागणैर्हारवतीव बाला ।

अधः सरन्ती गगनाऽङ्गणाद् वा शैलं समालिङ्गति मेघमाला ॥ (श्लोकः ७)

अत्रोपमानोपमेयभूतयोः जलालवालयोः, गगनाङ्गणयोरभेदारोपाद्रूपकम् ।

एवमेव 'द्रवत्कुमारीकुचकुम्भसारा' (श्लो.१७) इत्यत्र कुचकुम्भयोरभेदारोपाद्रूपकालङ्कारः ।

**७.१.५.उत्प्रेक्षा**

प्रकृतस्यार्थस्य असम्भविनोपमानेन सह यत्सम्भावनं क्रियते सैवोत्प्रेक्षा । मम्मटेनास्य लक्षणमनेन प्रकारेण प्रतिपादितम् -

सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् । (मम्मटः, ई.१९९४ : ४५८) । यथा -

दिने यथेच्छं स्वपितीव तुष्टा रात्रौ तु जागर्ति पिशाचिनीव ।

विस्तार्य विभ्रान्तिमहर्निशं सा शैलं समालिङ्गति मेघमाला ॥ (श्लो.८)

अत्र मेघमालायाः पिशाचिन्याः सह सम्भावनं विहितम्, अतोऽत्र उत्प्रेक्षालङ्कारः । यथा वा -

भस्माऽऽभमारादपि धूमकान्तिं मुखैः कदाचिद् गिलतीव विश्वम् । (श्लो.९)

अत्रापि मेघमाला विश्वं गिलतीव इति सम्भावनादुत्प्रेक्षालङ्कारः ।

**७.१.६. समासोक्तिः**

प्रकृताप्रकृतयोः समेन कार्येण प्रस्तुतेऽप्रस्तुतव्यवहारसमारोपः समासोक्तिः । उक्तञ्च विश्वनाथेन -

समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः ।

व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः ॥ (विश्वनाथः, ई. १९९५ : ९७२) यथा -

तरङ्गिणी चुम्बति तं पयोधिं ककुभ् यथा माघवनी हिमांशुम् ।

देवेन्द्रबाणासन-कण्ठहारा शैलं समालिङ्गति मेघमाला ॥ (श्लो.५)

अत्र मेघमाला-शैलः, तरङ्गिणी-पयोधिः, ककुभ्-हिमांशुः इति शब्दयुग्ममाध्यमेन नायिका-नायकरूपस्य प्रकृतार्थस्य प्रतिपादनात् समासोक्त्यलङ्कारः ।

एवमेवास्यां कवितायां विरोधाभासालङ्कारोऽपि संलक्ष्यते । 'साऽङ्गा निरङ्गाऽपि' (श्लो.१२) इत्यत्र विरोधाभासालङ्कारो दृश्यते । तथैव 'रुचा सुकेशीव तु मञ्जुघोषा हाहेति भीतैः शिशुभिश्च दृष्टा' (श्लो.१३), इत्यत्र भीतानां शिशूनामवस्थाचित्रणात् स्वभावोक्तिरलङ्कारोऽपि प्राप्यते । अतो विविधैः शब्दार्थालङ्कारैरियं कविता मनोहारी सञ्जाता ।

**७.२. छन्दःप्रयोगः**

कवितायां छन्दसः महती भूमिका भवति । छन्दःप्रयोगेणैव कविता श्रुतिमधुरा हृदयाह्लादिका गेयात्मिकी च भवति । अस्यां कवितायाम् उपजातिवृत्तस्य प्रयोगोऽस्ति । कवितायाः शीर्षखण्ड एव कविना छन्दोनाम सूचितं दृश्यते । उपजातिछन्दसः लक्षणम् -

अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ।

इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम ॥ (ढकालः, २०६७ : पृ.२८४)

इन्द्रवज्रोपेन्द्रवज्रयोर्वृत्तयोर्मिश्रणेन उपजातिवृत्तं जायते । अन्येषु वृत्तेषु मिश्रितेष्वपि उपजातिरेव भवति । उदाहरणपद्यं यथा -

दृश्या कदाचित्तु गजावलीव सुधासिता वा भवनावलीव ।

विपश्चितां दृष्टिविनोदिनी सा शैलं समालिङ्गति मेघमाला ॥ (श्लो.३ )

अत्र प्रथमतृतीयपादयोः इन्द्रवज्रावृत्तम्, द्वितीयचतुर्थपादयोः उपेन्द्रवज्रावृत्तमस्ति । द्वयोः मिश्रणेनात्र लक्षणानुसारेणोपजातिवृत्तं वर्तते । अस्याः कविताया सकलेष्वष्टादशसु पद्येष्वस्यैव छन्दसः प्रयोगो विद्यते ।

**७.३ रसभावप्रयोगः**

कवितेयं शृङ्गारपरा वर्तते । कविनाप्यस्य कवितासङ्ग्रहस्य विषयसूचीप्रतिपादनक्रमे कवितामिमां शृङ्गारस्तवककोटौ विन्यस्तवान् । शृङ्गाररसस्य स्थायिभावः रतिर्भवति, रसोऽयं रसराजनाम्नापि ज्ञायते । नायकनायिकादयः शृङ्गारस्यालम्बनविभावाः, चन्द्रचन्दनादिरुद्दीपनविभावाः, भ्रूविक्षेपकटाक्षादिरनुभावाः, आवेगदैन्यादयो व्यभिचारिभावाः । (विश्वनाथः, ई.१९९४ : २२८-२२९) । अस्यां कवितायां शृङ्गाररसस्योदाहरणम्-

गुहासु लीना शिखरेषु सुप्ता पादप्रपन्नेव च भक्तियुक्ता ।

योषेव काचिन्मदनातुरा वा शैलं समालिङ्गति मेघमाला ॥ (श्लो.४)

अत्र मेघमाला-शैलौ नायिकानायकत्वेन कल्पितौ । अप्रस्तुतविषयवर्णनात् समासोक्त्यलङ्कारमाध्यमेन मदनातुरायाः नायिकाया कामोद्दीपनत्वप्रकाशनादत्र सम्भोगशृङ्गाररसः । कवितायां प्रयुक्तानां 'वामेव विद्युन्नयनैः कराला', 'रोमोद्गमाढ्यं तरुकण्टकैर्वा', 'तरङ्गिणी चुम्बति तं पयोधिम्', 'कान्तेन संश्लिष्यति मुग्धबाला', 'उन्निद्रनेत्रोत्पलसुन्दरीभिर्भयेन दृष्टा पुरसुन्दरीभिः' इत्यादीनां पदावलीनां प्रयोगावलोकनादप्यत्र शृङ्गाररसस्यैव प्राधान्यमस्तीति ज्ञायते । अत्र विद्यमानेषु सकलेष्वपि पद्येषु शृङ्गाररसः प्रकर्षेण विद्योतते । रसस्य प्राधान्येन प्रतिपादनादत्रासंलक्ष्यक्रमव्यङ्ग्यध्वनिः प्रकर्षेण व्यज्यते ।

**७.४ उद्देश्यकथनम्**

प्रयोजनेन विना कोऽपि किमपि कार्यं प्रत्युन्मुखो न भवति । कवितालेखनेऽपि कवेः किमप्युद्देश्यं भवति । यदा गुरुः टीकारामः काष्ठमण्डपस्थवाल्मीकिविद्यापीठस्य साहित्यविषयस्य विभागाध्यक्षोऽभवत्, तदा साहित्यिकेषु कार्यक्रमेषु सक्रियतां प्रदर्शयन् विभागसम्बद्धान् सदस्यानपि साहित्यरचनायां प्रेरयितुं 'शैलं समालिङ्गति मेघमाला' इति शीर्षकमवलम्ब्य कवितां रचयितुं प्रेरितवान्, स्वेनापि लिखितवान् इति तस्यैव विद्यापीठस्य प्राध्यापकवर्यो जीवनोऽधिकारी कवितालेखनस्योद्देश्यं प्रकाशयति ।

अस्यां कवितायां प्रकृतिचित्रणमेव कवेः प्रमुखमुद्देश्यं प्रतिभाति । प्राकृतिकदृष्ट्या नेपालोऽतीव सुन्दरो देशो विद्यते । नेपालस्योत्तरदिशि हिमशैला विद्योतन्ते, हरितानि वनानि विलसन्ति, निर्मला नद्यश्चात्र प्रवहन्ति । वर्षर्तौ यदा मेघमालाः शैलेषु सञ्चरन्ति तदाऽपूर्वा शोभा दृश्यते, तां सौन्दर्यछटामवलोक्य जना मुग्धा जायन्ते । कविना स्वप्रतिभाबलेन कवितालेखनस्य दीर्घसाधनया चेदृशी परिष्कृता वैचित्र्यभरिता कविता निर्मिता । अत्र मनोहारितया प्रकृतेः मानवीकरणं विहितम् । चेतनाविहिनासु मेघमालासु कविना प्राणा भरिताः । निश्चलः शैलोऽपि सजीवत्वेन प्रतिपादितः । अत्र मेघमालाः शैलम् आलिङ्गन्ति, तरङ्गिणी पयोधिं चुम्बति । कविना प्रकृतावपि मानवीया भावाः, व्यवहाराश्च प्रकाशिताः । प्रकृतिचित्रणमाध्यमेनाप्रत्यक्षतया सहृदयहृदि शृङ्गारिकं भावं जनयित्वाह्लादप्रकाशनमेवास्याः कवितायाः प्रमुखमुद्देश्यमस्ति । अत्र कविना साङ्ख्यदर्शनस्य विषयोऽप्युपस्थापितः, मेघमाला पुरुषस्य मायातुल्याऽस्ति, त्रिगुणैर्निर्मिता कायातुल्या वर्तत इत्युक्तम् । कृषिकर्मपरायणा वनिता अपि मेघसन्दर्शनात् सन्तुष्टा जायन्त इति प्रतिपाद्य कविना कृषिकर्म प्रति प्रीतिः प्रकटिता । प्रकृतिजगतोऽङ्गभूतानां मेघ-गगन-सूर्य-चन्द्र-तारा-विद्युत्-द्रुम-गुहा-हिमालय-नदी-समुद्र-गज-तुरग-मयूर-पिकादीनां यथावसरं वर्णनेन कविना प्रकृतिं प्रत्यनुरागः प्रकाशितः । प्रकृतिमाध्यमेन तात्कालिकस्य मानवसमाजस्य संस्कृतेश्च चित्रणमप्यस्याः कवितायाः उद्देश्यं संलक्ष्यते ।

### ७.५ भाषाशैली

कवेः टीकारामस्य कवितेयं भाषाप्रयोगदृष्ट्याऽतीव सरला सुकोमला च विद्यते । अत्रत्या भाषा शुद्धा परिष्कृता प्रौढा प्राञ्जला च वर्तते । अत्र समस्ताः शब्दा न्यूनाः सन्ति, असमस्तपदानामेव बाहुल्यमस्ति । सरलया भाषयाऽप्यत्र विविधानां शब्दार्थालङ्काराणां चमत्कृतिर्विद्योतते । लाक्षणिकानां पदावलीनां प्रयोगेणापि कविता समुत्कृष्टा दरीदृश्यते । अत्र प्रतिश्लोकं पदलालित्यमस्ति, अनुप्राससौष्ठवं विलसति । कवितायां कोमलता, रसपूर्णता च विद्यते । समस्यापूर्तिशैल्यां संरचितेयं कविता प्रभावपूर्णा पठनीया च वर्तते । माधुर्यगुणव्यञ्जकैर्वर्णैर्वैदर्भीरीतिविलसिताभिः संरचनाभिश्च कवितेयं श्रुतिमधुरा हृदयाह्लादिका चानुभूयते । अस्याः कवितायाः शैलीसौन्दर्यप्रतिपादकमेकमुदाहरणं यथा -

> गुहासु लीना शिखरेषु सुप्ता पादप्रपन्नेव च भक्तियुक्ता ।
>
> योषेव काचिन्मदनातुरा वा शैलं समालिङ्गति मेघमाला ॥ (श्लो.४)

कवितायां वर्णनात्मिकी शैली दृश्यते । कविना गगने उड्डीयमानस्य मेघस्य वर्णनेन चमत्कृतिरुत्पादिता । आलङ्कारिक्यां शैल्यां कविना मेघमालाया वर्णनं विहितम् । कविकल्पनाचातुर्येण कवितेयं समुत्कृष्टा जाता ।

### ८. निष्कर्षः

कविः टीकारामोऽधिकारी नैपालकानां संस्कृतकवीनां पङ्क्तावग्रस्थानं भजते । नेपालीभाषासु संस्कृतभाषासु चास्य लेखनी समानरूपेण प्रवाहिताऽवलोक्यते । स्फुटकवितातो महाकाव्यपर्यन्तं निर्मात्राऽनेन नेपालीसाहित्यं संस्कृतसाहित्यञ्चाधिकम् उपकृतम् । अस्य पद्यपुष्पाञ्जलिकवितासङ्ग्रहान्तर्गतायाः 'शैलं समालिङ्गति मेघमाला' इति कवितायाः साहित्यिकेनानुशीलनेनाधिगतो निष्कर्षो बिन्दुरूपेणाधः प्रदर्श्यते ।

- कवेः टीकारामस्य 'शैलं समालिङ्गति मेघमाला' कविता साहित्यिकदृष्ट्या समुत्कृष्टा वर्तते ।
- पौरस्त्यकाव्यशास्त्रिभिः प्रतिपादितानां काव्यतत्त्वानां साहित्यिकतत्त्वानां वाऽस्यां कवितायां प्रचुरः प्रयोगः संलक्ष्यते ।

- कवितायामस्याम् अनुप्रासोपमोत्पेक्षारूपकसमासोक्तिप्रभृतीनां शब्दार्थालङ्काराणां बहुलः प्रयोगोऽवलोक्यते ।
- कविताया भावानुकूलप्रयुक्तेनोपजातिवृत्तेनेयं कविता गेयात्मिकी सहृदयहृदयाह्लादिका च जाताऽस्ति ।
- कविना प्रकटिताः प्रकृतिप्रेम-देशभक्ति-ग्रामीणजीवनानुरक्तिविषयका भावाश्चास्यां कवितायामभिव्यज्यन्ते ।
- कविनात्र प्रकृत्या मानवीकरणं विहितम् । अत्र निश्चला प्रकृतिरपि सजीवो मानववदाचरति, मेघमाला शैलमालिङ्गति, शिखरेषु स्वपिति, मदनातुरा भवति, नदी पयोधिं च चुम्बति ।
- शृङ्गाररसेनाभिसिञ्चितेयं कविता पाठकान् रोमाञ्चितान् विधातुं समर्था परिलक्ष्यते ।
- अस्यां कवितायां प्रतिश्लोकं पदलालित्यमस्ति, अनुप्राससौष्ठवं विलसति, कोमलता, रसपूर्णता च विद्यते ।
- समस्यापूर्तिशैल्यां संरचितेयं कविता प्रभावपूर्णा पठनीया च वर्तते । माधुर्यगुणव्यञ्जकैर्वर्णैर्वैदर्भीरीतिविलसिताभिः संरचनाभिश्च कवितेयं श्रुतिमधुरा हृदयाह्लादिका चानुभूयते ।

**सन्दर्भग्रन्थसूची**

अधिकारी, टीकाराम (२०६४), पद्यपुष्पाञ्जलिः, काठमाडौं : लेखक ।

---. (२०६९), पञ्चगङ्गा (काव्यसन्दोहिका), कास्की : विश्वेश्वरी अधिकारी ।

---. (२०७२), कल्पनाका छाल (कवितासङ्ग्रह), काठमाडौं : लेखक ।

---. (२०७२), विश्वम्भरा(महाकाव्य), काठमाडौं : लेखक ।

---. (२०७२), हेमालाई पत्र (पत्रसाहित्य), कास्की : लेखक ।

आनन्दवर्धन (२०११), ध्वन्यालोक, लोचनटीका समेत (व्याख्याता-जगन्नाथ पाठक), वाराणसी : चौखम्बा विद्याभवन ।

ढकाल, वेणीमाधव, (२०६७), काव्यदीपिका, (दो.सं.), काठमाडौं : विद्यार्थी पुस्तक भण्डार ।

तिमिल्सिना, महानन्द, (२०७५), कवेः टीकारामस्य 'मातृभूशोकदुर्दिनम्' कविताया विश्लेषणम्, शोध (वर्ष-६, अङ्क -२), ने.सं.वि. प्राध्यापक सङ्घ ।

देवकोटा, विष्णुप्रसादशर्मा एवमन्ये (सम्पा.), (२०७०), संस्कृतकवितासङ्ग्रहस्थानां कवितानां समीक्षणम्, (ले. नवराजकट्टेलः), काष्ठमण्डपः : जयतु संस्कृतम् ।

पाण्डेयः, हरिः 'पथिक', (२०७६), निरातङ्कं जीवमानष्टीकारामोऽधिकारी, गोरखापत्र, आषाढ १, संस्कृतपृष्ठ, काठमाडौं ।

मम्मटः, (ई.१९९४), काव्यप्रकाशः (द्वि.सं.), वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान ।

वामनः, (ई.२०१०), काव्यालङ्कारसूत्रवृत्तिः, (व्याख्याता-पं. केदारनाथ शर्मा), च.सं., वाराणसी : चौखम्बा कृष्णदास अकादमी ।

विश्वनाथ, (ई.१९९४), साहित्यदर्पण, (च.सं.), (टीका : शेषराजशर्मा), वाराणसी : कृष्णदास अकादमी ।

**परिशिष्टः**

कवेः टीकारामस्य 'शैलं समालिङ्गति मेघमाला' कविता

सम्पूर्णगर्भेव नदद्बलाका श्यामा क्वचिद् व्यक्तसुधांशु-हासा ।
वामेव विद्युन्नयनैः कराला शैलं समालिङ्गति मेघमाला ॥ १ ॥
परिभ्रमन्ती मृदितेव काचिद् द्रुमेषु विश्रान्तिमती कदाचित् ।
रोमोद्गमाढ्यं तरुकण्टकैर्वा शैलं समालिङ्गति मेघमाला ॥ २ ॥
दृश्या कदाचित्तु गजावलीव सुधासिता वा भवनावलीव ।
विपश्चितां दृष्टिविनोदिनी सा शैलं समालिङ्गति मेघमाला ॥ ३ ॥
गुहासु लीना शिखरेषु सुप्ता पादप्रपन्नेव च भक्तियुक्ता ।
योषेव काचिन्मदनातुरा वा शैलं समालिङ्गति मेघमाला ॥ ४ ॥
तरङ्गिणी चुम्बति तं पयोधिं ककुभ् यथा माघवनी हिमांशुम् ।
देवेन्द्रबाणासन-कण्ठहारा शैलं समालिङ्गति मेघमाला ॥ ५ ॥
रक्ता कदाभिच्छयिताऽरुणेन तिरस्कृता किन्तु दिवाकरेण ।
कान्तेन संश्लिष्यति मुग्धबाला शैलं समालिङ्गति मेघमाला ॥ ६ ॥
जलाऽऽलवाला तुहिनांशुभाला तारागणैर्हारवतीव बाला ।
अधः सरन्ती गगनाऽङ्गणाद् वा शैलं समालिङ्गति मेघमाला ॥ ७ ॥
दिने यथेच्छं स्वपितीव तुष्टा रात्रौ तु जागर्ति पिशाचिनीव ।
विस्तार्य विभ्रान्तिमहर्निशं सा शैलं समालिङ्गति मेघमाला ॥ ८ ॥
भस्माऽऽभमारादपि धूमकान्तिं मुखैः कदाचिद् गिलतीव विश्वम् ।
आक्षेप-विक्षेपकलाऽऽकुला सा शैलं समालिङ्गति मेघमाला ॥ ९ ॥
उन्निद्रनेत्रोत्पलसुन्दरीभिर्भयेन दृष्टा पुरसुन्दरीभिः ।

दासीकृताऽनेककवीन्द्रजाला शैलं समालिङ्गति मेघमाला ॥ १० ॥
पर्जन्यसम्पत्परिपालिताभिर्दृष्टा सहर्षं कृषकाङ्गनाभिः ।
उच्चैरधोऽन्तर्गतितुष्टबाला शैलं समालिङ्गति मेघमाला ॥ ११ ॥
आभाति यद्वा पुरुषस्य माया गुणैस्त्रिभिर्निर्मितजन्तुकाया ।
साऽङ्गा निरङ्गाऽपि मृदङ्गताला शैलं समालिङ्गति मेघमाला ॥ १२ ॥
रुचा सुकेशीव तु मञ्जुघोषा हाहेति भीतैः शिशुभिश्च दृष्टा ।
अनेकभागाऽखिलदिग्गजाऽऽभा शैलं समालिङ्गति मेघमाला ॥ १३ ॥
विमानलेखेव महाटवीव वितानलीना पिकमण्डलीव ।
दरीव काकाकुलसान्धकारा शैलं समालिङ्गति मेघमाला ॥ १४ ॥
नृत्यन्मयूरा वनपङ्क्तिरम्या श्रीसूर्यदेवस्य करैरदम्या ।
स्निग्धाऽलकालीव रतिप्रदा सा शैलं समालिङ्गति मेघमाला ॥ १५ ॥
अवर्णनीयेति मयार्चिता सा कालीव केशैर्मलिनीकृताशा ।
अभीष्टकाव्यप्रतिभामराला शैलं समालिङ्गति मेघमाला ॥ १६ ॥
रतान्तरेषु प्रणयप्रणीता टीकेव भूमेश्च ससागरायाः ।
द्रवत्कुमारीकुचकुम्भसारा शैलं समालिङ्गति मेघमाला ॥ १७ ॥
रसा-रमण्याश्चुचुकस्य शोभां सम्पादयित्री शिखराग्रजाताम् ।
रतार्थिनीवद् विवृताङ्गभारा शैलं समालिङ्गति मेघमाला ॥ १८ ॥